११

फिट्-स्वराः

प्रस्तावना-

अस्मिन् पाठे फिट्सूत्राणि आलोचितानि। फिट् इति संज्ञावाचकं पदम्। एषा च संज्ञा महर्षिपाणिनेः पूर्वकालादेव प्रवर्तमाना अस्ति। एतानि सूत्राणि फिषम् अर्थात् प्रातिपदिकम् आश्रित्यैव प्रवर्तन्ते। एतैः च फिट्- सूत्रैः प्रधानतया शब्दानां स्वरविधानं शास्यते। कस्य शब्दस्य कदा कस्मिंश्च अर्थे कुत्र कः स्वरः स्यात् इति सर्वमेव विस्तृततया एषु सूत्रेषु आलोचितानि। अतः अस्मात् पाठात् भवान् भवती वा कस्य शब्दस्य कदा कुत्र कः स्वरः भवति इति विषये विस्तरेण ज्ञास्यति।

उद्देश्यानि-

इमं पाठं पठित्वा भवान् वा-

- लोके वेदे च शब्दानां स्वरव्यवस्था कथं भवति इति विषये अधिकतया ज्ञातुं शक्नुयात्।
- फिट्सूत्राणां विषये विशेषरूपेण ज्ञातुं शक्नुयात्।
- अपाणिनीयत्वे अपि फिट्सूत्राणि कथं प्रमाणरूपेण स्वीकृतानि इति विषये ज्ञातुं शक्नुयात्।
- विभिन्नासु अवस्थासु विभिन्नानां शब्दानाम् आद्युदात्तत्वविषये अन्तोदात्तत्वविषये सर्वोदात्तत्वविषये च अधिकतया ज्ञातुं शक्नुयात्।
- सूत्राणाम् अर्थनिर्णयं कर्तुं समर्थो भवेत्।
- सूत्राणां व्याख्यानं कर्तुं स्वयमपि योग्यो भवेत्।
- अनुवृत्त्यादीनां ज्ञानं भवितुं शक्नुयात्।

अथ फिट्स्वराः

११.१) फिषोऽन्त उदात्तः

सूत्रार्थः- प्रातिपदिकं फिट् स्यात्। तस्यान्त उदात्तः स्यात्।

सूत्रावतरणम्- फिट्-रूपस्य प्रातिपदिकस्य अन्त्यस्य उदात्तविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रमिदम्। अनेन फिषः प्रातिपदिकस्य वा अन्तस्य उदात्तस्वरः विधीयते। अस्मिन् सूत्रे फिषः अन्तः उदात्तः इति पदच्छेदः। त्रिपदात्मके अस्मिन् सूत्रे फिषः इति षष्ठ्येकवचनान्तं पदम्, अन्तः इति प्रथमैकवचनान्तं पदम्, उदात्तः इत्यपि प्रथमैकवचनान्तं पदम्। एवञ्च अत्र पदान्वयः इत्थं - फिषः अन्तः उदात्तः इति। अयं च सूत्रार्थः- फिषः प्रातिपदिकस्य वा अन्त्यस्य उदात्तः स्यात् इति।

उदाहरणम्- उच्चैः।

सूत्रार्थसमन्वयः- उच्चैः इति पदं पाणिनीयैः सूत्रैः न प्रातिपदिकसंज्ञकम्, अपि तु पूर्वाचार्यैः प्रातिपदिकम् इत्युच्यते। अतः तस्य फिषः प्रातिपदिकस्य वा अन्त्यः ऐकारः प्रकृतसूत्रेण उदात्तः भवति।

विशेषः- फिट्- संज्ञा न हि पाणिनिना विहिता। अपि तु बहुपूर्वकालात् एव पूर्वाचार्यैः एषा संज्ञा विहिता। अत एव उच्यते आचार्येण वासुदेवदीक्षितेन- 'फिडिति पूर्वाचार्यप्रसिद्ध्या प्रातिपदिकमुच्यते' इति। एतानि सूत्राण्यपि यद्यपि अपाणिनीयानि तथापि भाष्यप्रामाण्यात् एतानि सूत्राणि महर्षिणा पाणिनिना स्वीकृतानि इति ज्ञायते। तथाहि भाष्यादिषु आद्युदात्तश्च इत्यादिषु सूत्रेषु प्रकृतेः अन्तोदात्तत्वं शास्यते। एताश्च अन्तोदात्तादिस्वरव्यवस्थाः फिट्- सूत्राणि विना न सम्भवन्ति। अतः एतेषां सूत्राणाम् अपाणिनीयत्वे अपि पाणिनीयैः प्रमाणत्वेन आश्रियन्ते।

११.२) छन्दसि च।

सूत्रार्थः- छन्दसि दक्षिणस्य आदिः अन्तः च उदात्तः भवति।

सूत्रावतरणम्- छन्दसि दक्षिणशब्दस्य आदेः अन्तस्य च स्थाने उदात्तत्वं विधीयते.

सूत्रव्याख्या- विधिसूत्रमिदम्। अत्र छन्दसि इति विषयसप्तम्यन्तं पदम्, च इति अव्ययम्। अनेन सूत्रेण दक्षिणशब्दस्य अन्तस्य आदेः च उदात्तत्वं विधीयते। अस्मिन् सूत्रे दक्षिणस्य साधौ इति सूत्रात् दक्षिणस्य इति षष्ठ्येकवचनान्तं पदम्, स्वाङ्गाख्यायामादिर्वा इति सूत्रात् आदिः इति प्रथमैकवचनान्तं पदम्, फिषोऽन्त उदात्तः इति सूत्रात् अन्तः इति च प्रथमैकवचनान्तं पदम्, उदात्तः इत्यपि प्रथमैकवचनान्तं पदमत्र अनुवर्तन्ते। तेन अत्र पदान्वयः भवति- छन्दसि दक्षिणस्य आदिः अन्तः उदात्तः इति। अत्र दक्षिणशब्देन न हि दक्षिणशब्दस्य अर्थः ग्राह्यः अपि तु दक्षिण इति शब्दस्वरूपमेव ग्राह्यम्। ततश्च सूत्रार्थः प्राप्यते- छन्दसि विषये दक्षिणशब्दस्य आदेः अन्तस्य च उदात्तः भवति इति।

उदाहरणम्- दक्षिणः।

सूत्रार्थसमन्वयः- दक्षिणः इति वैदिकप्रयोगः। अतः प्रकृतसूत्रेण तस्य दक्षिणशब्दस्य अन्तस्य अकारस्य आदेः अकारस्य च उदात्तत्वं विधीयते।

११.३) घृतादीनां च

सूत्रार्थः- घृतादीनां शब्दानाम् अन्त्यस्वरः उदात्तः स्यात्।

सूत्रावतरणम्- घृतादीनां शब्दानाम् अन्त्यस्वरस्य स्थाने उदात्तस्वरस्य विधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- सूत्रम् इदं विधायकम्। अनेन सूत्रेण घृतादीनां शब्दानाम् अन्त्यस्वरस्य स्थाने उदात्तस्वरस्य विधानं भवति। अत्र द्वे पदे स्तः। तत्र च घृतादीनाम् इति षष्ठीबहुवचनान्तं पदम्, च इति अव्ययपदम्। अस्मिन् सूत्रे अङ्गुष्ठोदकवकवशानां छन्दस्यन्तः इति सूत्रात् अन्तः इति प्रथमैकवचनान्तं पदम्, फिषोऽन्त उदात्तः इति सूत्रात् उदात्तः इति विधेयस्वरबोधकं पदं च अनुवर्तते। अत्र घृतादीनाम् इति विशेषणपदसामर्थ्यात् शब्दानाम् इति विशेष्यबोधकं पदम् आक्षिप्यते। तेन अत्र पदान्वयः भवति- घृतादीनां शब्दानां च उदात्तः इति। ततश्च अत्र सूत्रार्थः भवति- घृतादीनां शब्दानाम् अन्त्यस्वरः उदात्तः स्यात् इति।

उदाहरणम्- घृतं मिमिक्षे।

सूत्रार्थसमन्वयः- घृतं मिमिक्षे इत्युदाहरणे घृतम् इति पदस्य अन्त्यः अकारः उदात्तः अस्ति। अत्र प्रकृतसूत्रेण एव घृतशब्दस्य अन्त्यस्य अकारस्य उदात्तत्वं विधीयते।

एवम् अन्यत्रापि प्रकृतसूत्रेण घृतादीनां शब्दानाम् अन्त्यस्य स्वरस्य उदात्तत्वं विधीयते। अत्र अयं घृतादिगणो हि आकृतिगणः भवति।

११.४) ज्येष्ठकनिष्ठयोर्वयसि

सूत्रार्थः- वयसि अर्थे ज्येष्ठकनिष्ठयोः शब्दयोः अन्तः उदात्तः स्यात्।

सूत्रावतरणम्- वयसि अर्थे ज्येष्ठकनिष्ठयोः शब्दयोः अन्त्यस्य स्वरस्य उदात्तत्वविधानार्थं सूत्रमदं प्रणीतमाचार्येण।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन उदात्तः स्वरः विधीयते। ज्येष्ठकनिष्ठयोः वयसि इति अत्र पदच्छेदः। एवञ्च अत्र ज्येष्ठकनिष्ठयोः इति षष्ठीद्विवचनान्तं पदम्, वयसि इति च सप्तम्येकवचनान्तं पदम्। फिषोऽन्त उदात्तः इति सूत्रात् अत्र अन्तः इति प्रथमैकवचनान्तं पदम्, उदात्तः इति च प्रथमैकवचनान्तं पदम् अनुवर्तते। ततश्च अत्र सूत्रस्य पदान्वयः भवति- वयसि ज्येष्ठकनिष्ठयोः अन्तः उदात्तः इति। अत्रापि ज्येष्ठकनिष्ठयोः इति पदेन ज्येष्ठ, कनिष्ठ इति शब्दस्वरूपमेव ग्राह्यम्, न च तयोः शब्दयोः अर्थः ग्राह्यः। एवञ्च अत्र सूत्रस्यास्य अर्थोऽयं लभ्यते- वयसि अर्थे ज्येष्ठकनिष्ठयोः शब्दयोः अन्तः उदात्तः स्यात् इति।

उदाहरणम्- ज्येष्ठ आंह चमसा। कनिष्ठ आंह चमसा।

सूत्रार्थसमन्वयः- ज्येष्ठ आंह चमसा इति प्रयोगः वेदे लभ्यते। अत्र ज्येष्ठ इति शब्दस्य प्रयोगः वयसि अर्थे वर्तते। तेन अत्र प्रकृतसूत्रेण ज्येष्ठशब्दस्य अन्तः स्वरः अकारः उदात्तो भवति।

कनिष्ठ आंह चमसा इति प्रयोगः अपि वेदे लभ्यते। किञ्च अत्रापि कनिष्ठशब्दस्य वयसि अर्थे प्रयोगः अस्ति। ततश्च प्रकृतसूत्रेण अत्रापि कनिष्ठशब्दस्य अन्त्यः स्वरः अकारः उदात्तो भवति।

११.५) अथादिः प्राक् शकटेः

सूत्रार्थः- अधिकारोऽयम्। शकटिशकट्योरिति यावत्।

सूत्रावतरणम्- अस्मात् सूत्रात् आरभ्य शकटिशकटयोरिति सूत्रं यावत् आदिः- इति पदस्य अधिकारार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- अधिकारसूत्रमिदम्। अनेन आदिः इति पदम् अधिक्रियते। अथ आदिः प्राक् शकटेः इति सूत्रगतपदच्छेदः। चतुष्पदात्मके अस्मिन् सूत्रे अथ इति अव्ययपदम्, आदिः इति प्रथमैकवचनान्तं पदम्, प्राक् इत्यपि प्रथमैकवचनान्तं पदम्, शकटेः इति च पञ्चम्येकवचनान्तं पदम्। अधिक्रियते इति पदमत्र आक्षिप्यते। एवञ्च अत्र पदान्वयः भवति- अथ प्राक् शकटेः आदिः अधिक्रियते इति। ततश्च अयं सूत्रार्थो लभ्यते- शकटिशकटयोरिति सूत्रात् पूर्वं यावत् आदिः इति पदम् अधिक्रियते इति।

उदाहरणम्- न संख्यायाः इति सूत्रे प्रकृतसूत्रेण विहितः आदिः इति प्रथमैकवचनान्तं पदम् अधिकृतं भवति।

११.६) ह्रस्वान्तस्य स्त्रीविषयस्य

सूत्रार्थः- ह्रस्वान्तस्य स्त्रीविषयस्य आदिः उदात्तः स्यात्।

सूत्रावतरणम्- स्त्रीविषयस्य ह्रस्वान्तस्य शब्दस्य आदेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- विधायकं सूत्रमिदम्। अनेन सूत्रेण ह्रस्वान्तस्य स्त्रीविषयस्य शब्दस्य आदिः स्वरः उदात्तो भवति। अस्मिन् सूत्रे द्वे पदे स्तः। तत्र च ह्रस्वान्तस्य इति षष्ठ्येकवचनान्तं पदम्, स्त्रीविषयस्य इत्यपि षष्ठ्येकवचनान्तं पदम्। अथादिः प्राक् शकटेः इति अधिकारसूत्रात् आदिः इति पदम् अत्र अधिकृतं वर्तते। फिषोऽन्त उदात्तः इति सूत्रात् अत्र उदात्तः इति विधेयस्वरबोधकं पदमनुवर्तते। ततश्च अत्र पदान्वयः भवति- ह्रस्वान्तस्य स्त्रीविषयस्य आदिः उदात्तः इति। तेन अयं सूत्रार्थः लभ्यते- ह्रस्वान्तस्य स्त्रीविषयस्य आदिः उदात्तो भवति इति।

उदाहरणम्- बलिः। तनुः।

सूत्रार्थसमन्वयः- बलिः इति शब्दः स्त्रीविषयः अस्ति किञ्च अयं शब्दः ह्रस्वान्तः अपि अस्ति। तस्मात् प्रकृतसूत्रेण तस्य बलिशब्दस्य आदेः स्वरस्य अकारस्य उदात्तत्वं विधीयते।

एवं तनुः इत्यत्रापि तनुशब्दस्य स्त्रीविषयत्वात् किञ्च ह्रस्वान्तत्वात् प्रकृतसूत्रेण तस्य शब्दस्य आदेः स्वरस्य अकारस्य उदात्तत्वं विधीयते।

११.७) तृणधान्यानां च द्व्यषाम्।

सूत्रार्थः- द्व्यचामित्यर्थः। द्व्यषां तृणधान्यानां च आदिः उदात्तः भवति।

सूत्रावतरणम्- द्व्यचां तृणधान्यानां च आदेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधायकम्। अनेन द्व्यज्विशिष्टानां तृणधान्यानां च शब्दानाम् आदिः स्वरः उदात्तः भवति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र च तृणधान्यानाम् इति षष्ठीबहुवचनान्तं पदम्, च इति अव्ययपदम्, द्व्यषाम् इति च षष्ठीबहुवचनान्तं पदम्। अथादिः प्राक् शकटेः इति सूत्रात् अत्र आदिः इति प्रथमैकवचनान्तं पदम् अधिकृतम्, उदात्तः इति प्रथमैकवचनान्तं च पदं फिषोऽन्त उदात्तः इति सूत्रात् अनुवर्तते। द्व्यचां तृणधान्यानां चेति पदानां विशेष्यरूपेण शब्दानाम् इति षष्ठीबहुवचनान्तं पदम् अत्र आक्षिप्यते। एवञ्च अत्र पदान्वयः इत्थं भवति- द्व्यचां तृणधान्यानां च शब्दानाम् आदिः उदात्तः इति। अत्र तृणधान्यपदेन न हि तयोः शब्दयोः स्वरूपं ग्राह्यम्, अपि तु तयोः अर्थः एव ग्राह्यः। ततश्च अत्र सूत्रार्थः भवति- द्व्यज्विशिष्टानां तृणधान्यवाचकानां च शब्दानाम् आदिः उदात्तो भवति इति।

उदाहरणम्- कुशाः। काशाः। माषाः। तिलाः।

सूत्रार्थसमन्वयः- कुश-इति शब्दे अज्द्वयं वर्तते। किञ्च अयं कुशशब्दः तृणवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य कुश- शब्दस्य आदेः स्वरस्य उकारस्य उदात्तत्वं विधीयते।

एवं काशाः इति शब्दे अज्द्वयं वर्तते। किञ्च अयं काश- शब्दः धान्यवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य काश- शब्दस्य आदेः स्वरस्य आकारस्य उदात्तत्वं विधीयते।

एवं माषाः इति शब्दे द्वौ अचौ स्तः। किञ्च अयं माष- शब्दः धान्यवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य माष- शब्दस्य आदेः स्वरस्य आकारस्य उदात्तत्वं विधीयते।

एवं तिलाः इति शब्देऽपि द्वौ अचौ स्तः। किञ्च अयं तिल- शब्दः धान्यवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य तिल- शब्दस्य आदेः स्वरस्य इकारस्य उदात्तत्वं विधीयते।

विशेषः- अत्रेदम् अवधेयं यत् तृणधान्यवाचकानि पदानि द्व्यज्विशिष्टानि स्युः, अन्यथा यदि तानि पदानि बह्वज्विशिष्टानि एकाज्विशिष्टानि वा स्युः तर्हि प्रकृतसूत्रेण तत्र तेषां शब्दानाम् आदिः स्वरः उदात्तो न भवति। तत्र उदाहरणं यथा- गोधूमाः। अत्र गोधूम इति शब्दस्य तृणवाचकत्वात् अपि, तस्य गोधूमशब्दस्य बह्वज्विशिष्टत्वात् प्रकृतसूत्रेण गोधूमशब्दस्य आदिः स्वरः ओकारः न उदात्तो भवति।

अपि च अत्र पदं यदि केवलं द्व्यच्-विशिष्टमेव भवति, तृणवाचकं धान्यवाचकं वा न भवति तर्हि तत्र प्रकृतसूत्रेण तस्य शब्दस्य आदिः स्वरः उदात्तो न भवति। तत्र उदाहरणं यथा- आम्रः इति। अत्र आम्रशब्दस्य द्व्यविशिष्टत्वादपि तृणवाचकत्वाभावात् धान्यवाचकत्वाभावाच्च प्रकृतसूत्रेण तस्य आम्र-शब्दस्य आदिः स्वरः आकारः उदात्तो न भवति।

११.८) अक्षस्यादेवनस्य।

सूत्रार्थः- अदेवनार्थे अक्षशब्दस्य आदिः उदात्तो भवति।

सूत्रावतरणम्- अदेवनस्य अक्षशब्दस्य आदेः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- इदं सूत्रं विधायकम्। अनेन अक्षशब्दस्य आदिः स्वरः उदात्तो भवति। अस्मिन् सूत्रे पदद्वयं वर्तते। तत्र अक्षस्य इति षष्ठ्येकवचनान्तं पदम्, अदेवनस्य इत्यपि षष्ठ्येकवचनान्तं पदम्। अस्मिन् सूत्रे अथादिः प्राक्ः शकटेः इति सूत्रात् आदिः इति प्रथमैकवचनान्तं पदम् अधिकृतम्, उदात्तः इति च प्रथमैकवचनान्तं पदं फिषोऽन्त उदात्तः इति सूत्रात् अनुवर्तते। ततश्च अत्र पदान्वयः भवति- अदेवनस्य अक्षस्य आदिः उदात्तः इति। अत्र अदेवन-शब्देन तदर्थः गृह्यते, अदेवनं नाम अद्यूतक्रिया। अपि च अत्र अक्ष-शब्देन तस्य शब्दस्य स्वरूपमेव ग्राह्यम्। तस्मात् प्रकृतसूत्रेण विहितं कार्यम् अदेवनार्थे प्रवर्तमानस्य अक्षशब्दस्य भवति। ततश्च अयं सूत्रार्थः अत्र लभ्यते- अदेवनार्थे अक्षशब्दस्य आदिः उदात्तो भवति इति।

उदाहरणम्- तेन नाक्षः।

सूत्रार्थसमन्वयः- तेन नाक्षः इति उदाहरणवाक्ये अक्ष- शब्दस्य अदेवनार्थे प्रयोगः अस्ति, तस्मात् प्रकृतसूत्रेण तस्य अक्षशब्दस्य आदेः स्वरस्य आकारस्य उदात्तत्वं विधीयते।

विशेषः- अत्रेदम् अवधेयं यत् प्रकृतसूत्रेण अदेवनार्थे प्रवर्तमानस्य अक्षशब्दस्य आदेः स्वरस्य अकारस्य उदात्तत्वं विधीयते। न हि देवनार्थे अपि प्रवर्तमानस्य अक्षशब्दस्य। अस्मात् एव कारणात् अक्षैर्मा दीव्यः इत्युदाहरणे अक्षशब्दस्य आदेः स्वरस्य अकारस्य उदात्तत्वं नास्ति। यतो हि अत्र अक्षशब्दः देवनार्थे प्रवर्तमानः अस्ति।

११.९) छन्दसि च।

सूत्रार्थः- छन्दसि विषये मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनाम् अन्येषां च शब्दानाम् आदिः द्वितीयः च स्वरः वा उदात्तः भवति।

सूत्रावतरणम्- छन्दसि मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनां शब्दानाम् अन्येषां च शब्दानाम् आदेः द्वितीयस्य वा स्वरस्य विकल्पेन उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन सूत्रेण मकरादीनां शब्दानाम् अन्येषां च शब्दानाम् आदिः द्वितीयश्च स्वरः विकल्पेन उदात्तो भवति। द्विपदात्मकमिदं सूत्रम्। अस्मिन् सूत्रे छन्दसि इति विषयसप्तम्यन्तं पदम्, च इति अव्ययपदम्। मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनामादिर्वा इति सूत्रात् अत्र मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनाम् इति षष्ठीबहुवचनान्तं पदम्, आदिः इति प्रथमैकवचनान्तं पदम्, वा इति अव्ययपदं च अनुवर्तन्ते। अथ द्वितीयां प्रागीषात् इति सूत्रात् द्वितीयाम् इति पदम् अधिकृतम्। तच्च पदम् अत्र प्रथमैकवचनान्ततया विपरिणम्यते। अतादिः प्राक् शकटेः इति सूत्रात् अत्र आदिः इति प्रथमैकवचनान्तं पदम् अत्र अधिकृतम्। फिषोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदमत्र अनुवर्तते। च इति अव्ययपदेन अत्र अन्येषामपि शब्दानां ग्रहणं भवति। ततश्च अत्र पदान्वयः भवति- छन्दसि मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनां च आदिः द्वितीयः वा उदात्तः इति। तेन

अयं सूत्रार्थः अत्र लभ्यते- छन्दसि विषये मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनाम् अन्येषां च शब्दानाम् आदिः द्वितीयः च स्वरः वा उदात्तः भवति इति।

उदाहरणम्- मकरः, वरूढः।

सूत्रार्थसमन्वयः- मकरः इति प्रयोगः वेदे दृश्यते, अतः प्रकृतसूत्रेण मकरशब्दस्य छन्दसि प्रवर्तमानत्वात् मकरादिगणे अन्तर्गतत्वात् च प्रकृतसूत्रेण तस्य मकरशब्दस्य आदिः स्वरः उदात्तो भवति।

एवं वरूढः इति प्रयोगः अपि वेदे दृश्यते,. किञ्च अस्य वरूढशब्दस्य मकरादिगणे अन्तर्गतत्वात् प्रकृतसूत्रेण तस्य वरूढशब्दस्य आदिः स्वरः उदात्तो भवति। एवंप्रकारेण अन्यत्रापि पारेवतादिषु शब्देषु अवगन्तव्यम्।

विशेषः- मकर-वरूढ-पारेवत-वितस्तेक्ष्वार्जि-द्राक्षा-कलोमा-काष्ठा-पेष्ठा-काशीनामादिर्वा इति सूत्रेणैव अत्र छन्दसि मकरादिशब्दानाम् आदेः द्वितीयस्य च स्वरस्य उदात्तत्वं सम्भवति। तथापि प्रकृतसूत्रेण मकरादिभिः सह अन्येषाम् अपि शब्दानाम् आदिः द्वितीयश्च स्वरः उदात्तो भवति। अस्मादेव कारणात् इदं प्रकृतसूत्रं पृथक्तया उपन्यस्तम्।

११.१०) सुगन्धितेजनस्य ते वा।

सूत्रार्थः- सुगन्धितेजनस्य ते इति शब्दस्य च आदिः द्वितीयः च विकल्पेन उदात्तः स्यात्।

सूत्रावतरणम्- सुगन्धितेजनस्य प्रथमस्य द्वितीयस्य च स्वरस्य, ते शब्दस्य च स्वरस्य विकल्पेन उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन उदात्तस्वरः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तत्र सुगन्धितेजनस्य इति षष्ठ्येकवचनान्तं पदम्, ते इति षष्ठ्यन्तानुकरणकं प्रथमैकवचनान्तं पदम्, वा इति अव्ययपदम्। अथ द्वितीयां प्रागीषात् इति सूत्रात् द्वितीयाम् इति पदम् अधिकृतम्। तच्च पदम् अत्र प्रथमैकवचनान्ततया विपरिणम्यते। अतादिः प्राक् शकटेः इति सूत्रात् अत्र आदिः इति प्रथमैकवचनान्तं पदम् अत्र अधिकृतम्। फिषोऽन्त उदात्तः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदमत्र अनुवर्तते। ततश्च अत्र पदान्वयः भवति- सुगन्धितेजनस्य ते आदिः द्वितीयः वा उदात्तः इति। ततश्च अत्र सूत्रार्थः भवति- सुगन्धितेजनस्य ते- इति शब्दस्य च आदिः द्वितीयः विकल्पेन उदात्तः स्यात् इति।

उदाहरणम्- सुगन्धितेजनाः।

सूत्रावतरणम्- प्रकृतसूत्रेण एव सुगन्धितेजनशब्दस्य आदेः उकारस्य द्वितीयस्य अकारस्य च स्वरस्य उदात्तत्वं विकल्पेन विधीयते। एवं ते इत्यत्रापि प्रकृतसूत्रेण विकल्पेन उदात्तः अस्ति।

पाठगतप्रश्नाः-१

१. फिट् नाम किम् ?
२. दक्षिणस्य आदिः अन्तः च केन सूत्रेण उदात्तः भवति ?
३. घृतादीनां च इति सूत्रेण किं भवति ?
४. वयसि अर्थे ज्येष्ठकनिष्ठयोः शब्दयोः अन्त्यस्य स्वरस्य उदात्तत्वं केन सूत्रेण?
५. अथादिः प्राक् शकटेः इति सूत्रेण किं पदम् अधिक्रियते ?
६. आम्रः इत्यत्र तृणधान्यानां च द्व्यषाम् इति सूत्रेण कथं न आद्युदात्तत्वम्?
७. अदेवनार्थे अक्षशब्दस्य आदिः उदात्तः केन सूत्रेण ?
८. सुगन्धितेजनशब्दस्य पर्यायेण उदात्तस्वरः केन सूत्रेण ?

११.११) शकटिशकट्योरक्षरमक्षरं पर्यायेण।

सूत्रार्थः- शकटिशकट्योः शब्दयोः अक्षरम् अक्षरं पर्यायेण उदात्तो भवति।

सूत्रावतरणम्- शकटिशकट्योः शब्दयोः स्वराणां पर्यायेण उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन पर्यायेण उदात्तस्वरः विधीयते। शकटिशकट्योः अक्षरम् अक्षरं पर्यायेण इति सूत्रगतपदच्छेदः। चतुष्पदात्मकेऽस्मिन् सूत्रे शकटिशकट्योः इति षष्ठीद्विवचनान्तं पदम्, अक्षरम्, अक्षरं चेति पदद्वयं प्रथमैकवचनान्तं, पर्यायेण इति च तृतीयैकवचनान्तं पदम्। फिषोऽन्त उदात्तः इति सूत्रात् अत्र उदात्तः इति विधेयस्वरबोधकं प्रथमैकवचनान्तं पदम् अनुवर्तते। ततश्च अत्र सूत्रस्यस्य पदान्वयः भवति- शकटिशकट्योः अक्षरम् अक्षरं पर्यायेण उदात्तः इति। अत्र शकटिशकट्योः इति पदस्य विशेष्यरूपेण शब्दयोः इति पदम् आक्षिप्यते। ततश्च अत्र सूत्रार्थो भवति- शकटिशकट्योः शब्दयोः अक्षरम् अक्षरं पर्यायेण उदात्तो भवति इति

उदाहरणम्- शकटी। शकटिः।

सूत्रार्थसमन्वयः- शकटी इत्यस्मिन् पदे प्रत्येकं स्वराः उदात्ताः सन्ति। अथ प्रकृतसूत्रेण एव पर्यायक्रमेण अत्र स्वराः उदात्ताः भवन्ति। एवं शकटिः इत्यत्रापि प्रकृसूत्रेण एव पर्यायक्रमेण स्वरवर्णाः उदात्ताः सन्ति।

विशेषः- अथादिः प्राक् शकटेः इति अधिकारसूत्रे प्राक् शकटेः इति वचनात् तेन सूत्रेण विहितः आदिः इति पदस्य अधिकारः प्रकृतसूत्रात् पूर्वं यावत् एव वर्तते। अस्मात् एव कारणात् अत्र पर्यायेण शकटिशकट्योः शब्दयोः स्वराः उदात्ताः भवन्ति।

११.१२) गोष्ठजस्य ब्राह्मणनामधेयस्य।

सूत्रार्थः- अक्षरमक्षरं पर्यायेणोदात्तम्।

सूत्रावतरणम्- ब्राह्मणनामधेयस्य गोष्ठजशब्दस्य स्वराणां पर्यायेण उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- विधिसूत्रमिदम्। अनेन उदात्तस्वरः विधीयते। अत्र द्वे पदे स्तः। गोष्ठजशब्दस्य ब्राह्मणनामधेयस्य चेति सूत्रगतपदच्छेदः। तत्र गोष्ठजशब्दस्य इति षष्ठ्येकवचनान्तं पदम्, ब्राह्मणनामधेयस्य इत्यपि षष्ठ्येकवचनान्तं पदम्। शकटिशकट्योरक्षरमक्षरं पर्यायेण इति सूत्रात् अक्षरम्, अक्षरं चेति प्रथमैकवचनान्तं पदद्वयम्, पर्यायेण इति तृतीयैकवचनान्तं पदम् अत्र अनुवर्तन्ते। ततश्च अत्र सूत्रस्यास्य पदान्वयः भवति- गोष्ठजशब्दस्य ब्राह्मणनामधेयस्य अक्षरमक्षरं पर्यायेण उदात्तः इति। प्रकृतसूत्रविहितं कार्यं गोष्ठज इति शब्दस्वरूपस्य भवति। किञ्च प्रकृतसूत्रविहितं कार्यं तदैव सम्भवति यदा गोष्ठजशब्दः कस्यापि ब्राह्मणस्य नाम भवति। अत एव सूत्रे ब्राह्मणनामधेयस्य इति पदम् उपन्यस्तमस्ति। एवम् अत्र अयं सूत्रार्थः लभ्यते ब्राह्मणनामधेयस्य गोष्ठजशब्दस्य प्रत्येकं स्वराः उदात्ताः भवन्ति इति।

उदाहरणम्- गोष्ठजो ब्राह्मणः।

सूत्रार्थसमन्वयः- गोष्ठजो ब्राह्मणः इत्यत्र गोष्ठज इति शब्दः कस्यचित् ब्राह्मणस्य नाम अस्ति। अतः प्रकृतसूत्रेण तस्य गोष्ठजशब्दस्य स्वरवर्णानाम् पर्यायक्रमेण उदात्तत्वं विधीयते।

विशेषः- अत्रेदम् अवधेयं यत् अयं गोष्ठजशब्दः ब्राह्मणस्य नाम भवति। अन्यथा तत्र प्रकृतसूत्रेण उदात्तत्वं न विधीयते। अत एव गोष्ठजः पशुः इत्यादौ गोष्ठजशब्दस्य ब्राह्मणस्य नामधेयत्वाभावात् प्रकृतसूत्रेण तत्र स्वराः उदात्ताः न भवन्ति। तत्र च कृदुत्तरप्रकृतिस्वरेण अन्तोदात्तः भवति।

११.१३) निपाता आद्युदात्ताः।

सूत्रार्थः- निपाता आद्युदात्ताः स्युः।

सूत्रावतरणम्- निपातसंज्ञकानाम् आद्यानां स्वराणाम् उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- षड्विधेषु पाणिनीसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तः स्वरः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः, तत्र निपाताः इति प्रथमाबहुवचनान्तं पदम्, आद्युदात्ताः इत्यपि प्रथमाबहुवचनान्तं पदम्। अत्र निपात इति संज्ञाबोधकं पदम्। च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, कूपत्, कुवित्, नेत्, चेत्, चणकच्चित्, यत्र, नह, हन्त, माकिः, माकिम्, नकिः नकिम्, माङ्, नञ्, यावत्, तावत्, त्वै, द्वै, न्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, वषट्, तुम्, तथाहि, खलु, किल, अथो, अथ, सुष्ठु, स्म, आदह – इत्यादयः निपातसंज्ञकाः।

तथाहि पाणिनीयशास्त्रे निपात इति संज्ञाबोधकं पदम्। तत्र निपातसंज्ञाविधायकानि नैकानि सूत्राणि सन्ति। यथा- चादयोऽसत्त्वे, प्रादयः इत्यादीनि। तेषु अद्रव्यवाचिनः शब्दाः ये च चादिगणे पठिताः

तेषां चादयोऽसत्त्वे इति सूत्रेण निपातसंज्ञा विधीयते। अद्रव्यवाचिनां प्रादिगणे पठितानां शब्दानां प्रादयः इति सूत्रेण निपातसंज्ञा भवति। एवमत्र पदान्वयः निपाताः आद्युदात्ताः इति। ततश्च अयं सूत्रार्थः लभ्यते- निपाताः आद्युदात्ताः स्युः इति। ततश्च सूत्रार्थः भवति- निपाताः आद्युदात्ताः स्युः इति।

उदाहरणम्- स्वाहा।

सूत्रार्थसमन्वयः- स्वाहा इति चादयोऽसत्त्वे इति सूत्रेण निपातसंज्ञकः। अतः तस्य निपातत्वात् प्रकृतसूत्रेण स्वाहा इति अस्य आदेः आकारस्य उदात्तत्वं विधीयते। एवं स्वधा, वषट्, पम्, तथाहि इत्यादीनां निपातानाम् आदीनां स्वराणाम् उदात्तत्वं विधीयते।

विशेषः- प्रकृतसूत्रे छन्दसि इति पदं न अनुवर्तते, आद्युदात्तश्च इति भाष्यकारोक्तस्य प्रामाण्यात्। तेन प्रकृतसूत्रेण विहितं कार्यं लोके अपि भवति वेदे अपि भवति।

११.१४) उपसर्गश्चाभिवर्जम्।

सूत्रार्थः- अभिशब्दं वर्जयित्वा उपसर्गाः आद्युदात्ताः स्युः।

सूत्रावतरणम्- अभिवर्जानाम् उपसर्गानाम् आदीनां स्वराणाम् उदात्तविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन अभिवर्जाः उपसर्गाः आद्युदात्ताः विधीयन्ते। अत्र त्रीणि पदानि सन्ति, उपसर्गः च अभिवर्जम् इति सूत्रगतपदच्छेदः। तत्र उपसर्गः इति प्रथमैकवचनान्तं पदम्, च इति अव्ययम्, अभिवर्जम् इति प्रथमैकवचनान्तं पदम्। अस्मिन् सूत्रे आदिः, उदात्तः इति प्रथमैकवचनान्तं पदद्वयम् अनुवर्तते। एवञ्च तत्र पदान्वयः भवति- अभिवर्जम् उपसर्गाः च आदिः उदात्तः इति। अत्र आदिः उदात्तः चेति पदद्वयम् आद्युदात्ताः इत्येवंरूपेण उपसर्गाः इति पदेन सह अन्वेति। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप – एते प्रादयः। ततश्च अत्र सूत्रार्थः भवति- अभि इत्युपसर्गं वर्जयित्वा अन्ये उपसर्गाः आद्युदात्ताः स्युः इति।

उदाहरणम्- उदु॑त्तमं॑ वरुण।

सूत्रार्थसमन्वयः- उद्वतः इत्यत्र उत् इति उपसर्गसंज्ञकः। अतः प्रकृतसूत्रेण अत्र उत् इत्यस्य स्वरस्य प्रकृतसूत्रेण उदात्तत्वं विधीयते। अत्र यदि अभि इत्युपसर्गः स्यात् तर्हि प्रकृतसूत्रेण तत्र न तस्य अभ्युसर्गस्य आद्युदात्तत्वम्। तत्र उदाहरणं यथा- अभ्य॑भिहि, अभराममस्थानम् इत्यदीनि।

ननु पूर्वसूत्रेण निपाता आद्युदात्ताः इत्यनेन एव अत्र उपादीनाम् उपसर्गानाम् आद्युदात्तत्वं सिध्यति, तथापि अत्र पृथक्तया कथं सूत्रमिदमुपन्यन्तम् ? इति प्रश्ने सति उच्यते यत् पूर्वसूत्रेण एव उपादीनाम् उपसर्गानाम् आद्युदात्तत्वं सम्भवति, तथापि उपसर्गेषु अभि इत्युपसर्गस्य आद्युदात्तत्वं न स्यात् तदर्थं सूत्रमिदम् उपन्यस्तम्।

११.१५) एवादीनामन्तः।

सूत्रार्थः- एवादयः अन्तोदात्ताः स्युः।

सूत्रावतरणम्- एवादीनां शब्दानाम् अन्त्यस्य स्वरस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- सूत्रमिदं विधायकम्। अनेन एवादीनां शब्दानाम् अन्तः उदात्तः भवति। एव आदीनाम् अन्तः इति सूत्रगतपदच्छेदः। तत्र एवादीनाम् इति षष्ठीबहुवचनान्तं पदम्, अन्तः इति च प्रथमैकवचनान्तं पदम्। निपाता आद्युदात्ताः इति सूत्रात् उदात्तः इति प्रथमैकवचनान्तं पदम् अत्र अनुवर्तते। ततश्च अत्र पदान्वयः भवति- एवादीनाम् अन्तः उदात्तः इति। एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, कूपत्, कुवित्, नेत्, चेत्, चणकच्चित्, यत्र, नह, हन्त, माकिः, माकिम्, नकिः नकिम्, माङ्, नञ्, यावत्, तावत्, त्वै, द्वै, न्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, वषट्, तुम्, तथाहि, खलु, किल, अथो, अथ, सुष्ठु, स्म, आदह इत्यादयः एवादयः। तेन अत्र सूत्रार्थः भवति- एवादीनाम् अन्तः उदात्तः स्यात् इति।

एवमादीनामन्तः इति च सूत्रस्यास्य पाठान्तरम्। तस्मिन् पक्षे एवम् इति अव्ययपदम्, आदीनाम् इति षष्ठीबहुवचनान्तं पदम्, अन्तः इति प्रथमैकवचनान्तं पदं भवति। अत्रापि उदात्तः इति प्रथमैकवचनान्तं पदं पूर्वसूत्रात् अनुवर्तते। ततश्च अत्र पदान्वयः भवति- एवम् आदीनाम् अन्तः उदात्तः इति। तेन च अत्र सूत्रार्थः भवति- एवम् इत्यदीनां शब्दानाम् अन्तः उदात्तः स्यात् इति।

उदाहरणम्- सह॑ ते पुत्र सू॒रिभिः॑, एव, एवम्, नूनम्।

सूत्रार्थसमन्वयः- आलोचिते सूत्रे एव इत्यादयः शब्दाः एवादौ अन्तर्भवन्ति, अतः प्रकृतसूत्रेण एव इत्यस्य अन्तः स्वरः उदात्तो भवति।

सह॑ ते पुत्र सू॒रिभिः॑ इत्यादिषु सह इति अन्तोदात्तत्वेन पठितम्। परन्तु षष्ठाध्यायस्य तृतीयपादे सहस्य सः इति सूत्रे सहशब्दः आद्युदात्तत्वेन पठितः। अतः इदं चिन्त्यम् इति आचार्याः।

११.१६) वाचादीनामुभावुदात्तौ।

सूत्रार्थः- (वाच्- इत्यादीनां शब्दानाम् उभौ एव वर्णौ उदात्तौ स्तः)।

सूत्रावतरणम्- वाचादीनां शब्दानाम् उभयोः वर्णयोः उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधायकम्। अनेन सूत्रेण वाचादीनां शब्दानाम् उभौ वर्णौ उदात्तौ भवतः।

अस्मिन् सूत्रे वाचादीनाम् उभौ उदात्तौ इति सूत्रगतपदच्छेदः। किञ्च अत्र वाचादीनाम् षष्ठीबहुवचनान्तं पदम्, उभौ इति प्रथमाद्विवचनान्तं पदम्, उदात्तौ इत्यपि प्रथमाद्विवचनान्तं पदम्। अत्र सूत्रस्यास्य पदान्वयः इत्थं- वाचादीनाम् उभौ उदात्तौ इति। ततश्च अयं सूत्रार्थः अत्र प्राप्यते- वाचादीनां शब्दानाम् उभौ वर्णौ उदात्तौ भवतः इति।

उदाहरणम्- वाचौ।

सूत्रार्थसमन्वयः- वाचौ इति वाच्-शब्दस्य प्रथमाद्विवचने रूपम्। अतः प्रकृतसूत्रेण वाच्-शब्दात् प्रथमाद्विवचने निष्पन्नस्य वाचौ इति शब्दस्य उभौ एव स्वरौ उदात्तौ भवतः। एवं वाचादिगणे पठितानाम् अन्येषां शब्दानाम् अन्यान्यपि रूपाणि अत्र उदाहरणानि।

अत्र अनुदात्तं पदमेकवर्जम् इति सूत्रेण प्राप्तस्य अनुदात्तस्य स्वरस्य बाधार्थम् अस्मिन् सूत्रे उभौ इति पदस्य ग्रहणम् अस्ति।

११.१७) चादयोऽनुदात्ताः।

सूत्रार्थः- चादयः निपाताः अनुदात्ताः स्युः।

सूत्रावतरणम्- अत्र चादीनां निपातानाम् आद्युदात्ताः इति सूत्रेण प्राप्तस्य आद्युदात्तत्वस्य बाधार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- संज्ञा-परिभाषा-विधि-नियमातिदेशाधिकारात्मकेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन अनुदात्तस्वरः विधीयते। अस्मिनि सूत्रे द्वे पदे स्तः, चादयः अनुदात्ताः इति। निपाताः इति प्रथमाबहुवचनान्तं पदम् तत्तु पूर्वसूत्रात् अनुवर्तते। ततश्च अत्र सूत्रस्यास्य पदान्वयः इत्थं -- चादयः निपाताः अनुदात्ताः इति। च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, कूपत्, कुवित्, नेत्, चेत्, चणकच्चित्, यत्र, नह, हन्त, माकिः, माकिम्, नकिः नकिम्, माङ्, नञ्, यावत्, तावत्, त्वै, द्वै, न्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, वषट्, तुम्, तथाहि, खलु, किल, अथो, अथ, सुष्ठु, स्म, आदह इत्यादयः चादयः। अयं च चादिगणः आकृतिगणः भवति। ततश्च अत्र अयं सूत्रार्थः लभ्यते -- चादयः निपातसंज्ञकाः अनुदात्ताः स्युः इति।

उदाहरणम् -- उ॒त त्वः।

सूत्रार्थसमन्वयः- उत इति निपातसंज्ञकः शब्दः। तस्य च चादिगणे पाठः वर्तते। अतः प्रकृतसूत्रेण चादिगणे पठितस्य उत इति निपातस्य आदेः उकारस्य अनुदात्तत्वं विधीयते। एवं वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस् -- इत्यादिषु अपि सूत्रस्यास्य उदाहरणं बोध्यम्।

११.१८) यथेति पादान्ते।

सूत्रार्थः- (पादान्ते यथेति अनुदात्तो भवति) ।

सूत्रावतरणम्- पादान्ते यथा इत्यस्य अनुदात्तस्वरविधानार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्यख्या- संज्ञा-परिभाषा-विधि-नियमातिदेशाधिकारात्मकेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन अनुदात्तस्वरः विधीयते। अस्मिन् सूत्रे यथा, इति, पादान्ते इति पदच्छेदः। पदत्रयात्मके अस्मिन् सूत्रे यथा इति अव्ययपदम्, इति इत्यपि अव्ययपदम्, पादान्ते इति च सप्तम्येकवचनान्तं पदम्। पूर्वसूत्रात् चादयोऽनुदात्ताः इति सूत्रात् अनुदात्ताः इति प्रथमाबहुवचनान्तं पदम् प्रकृतसूत्रे अनुवर्तते। ततश्च अत्र

पदान्वयः भवति -- पादान्ते यथा इति अनुदात्तः इति। एवञ्च अत्र सूत्रार्थः इत्थं सिध्यति -- पादान्ते यथा इति अनुदात्तो भवतीति।

उदाहरणम्- तन्नेमिमृभवौं यथा।

सूत्रार्थसमन्वयः- तन्नेमिमृभवौं यथा -- इति उदाहरणे अनुष्टुप्- छन्दः वर्तते। किञ्च अत्र यथा इति शब्दः पादस्य अन्ते अस्ति। अतः प्रकृतसूत्रेण तदन्त्यस्य आकारस्य अनुदात्तत्वं विधीयते।

११.१९) प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः।

सूत्रार्थः- द्विरुक्तौ प्रकारादिशब्दानां परस्य अन्तः उदात्तो भवति।

सूत्रावतरणम्- प्रकारादि शब्दानां द्विरुक्तौ तत्र द्वितीयस्य प्रकारादिशब्दस्य अन्तस्य स्वरस्य उदात्तत्वविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्यख्या- संज्ञा-परिभाषा-विधि-नियमातिदेशाधिकारात्मकेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन उदात्तस्वरः विधीयते। अस्मिन् सूत्रे पञ्च पदानि सन्ति। तत्र प्रकारादि इति प्रथमैकवचनान्तं पदम्, द्विरुक्तौ इति सप्तम्येकवचनान्तं पदम्, परस्य इति षष्ठ्येकवचनान्तं पदम्, अन्तः इति प्रथमैकवचनान्तं पदम्, उदात्तः इत्यपि च प्रथमैकवचनान्तं पदम्। ततश्च सूत्रस्यास्य पदान्वयः भवति -- प्रकारादिद्विरुक्तौ परस्य अन्तः उदात्तः इति। एवञ्च अत्र सूत्रार्थो लभ्यते -- प्रकारादिशब्दानां द्विरुक्तौ सत्यां तत्र द्वितीयस्य प्रकारादेः अन्तस्य अचः उदात्तस्वरः भवति इति।

उदाहरणम्- पटुपटुः।

सूत्रार्थसमन्वयः- अयं पटु- शब्दः प्रकारादिगणे पठितः। अतः पटुपटुः इति उदाहरणे प्रकारादिगणे पठितस्य पटु शब्दस्य प्रकारे गुणवचनस्य इति सूत्रेण द्वित्वे पटु पटु इति स्थिते प्रकृतसूत्रेण द्वितीयस्य पटुशब्दस्य अन्त्यस्य उकारस्य उदात्तत्वं भवति। ततश्च विभक्तिकार्ये पटुपटुः इति रूपं सिध्यति।

विशेषः- इदं च प्रकृतसूत्रविहितं कार्यं कर्मधारयवदुत्तरेषु इति कर्मधारयवद्भावादेव सिध्यति, तेन इदं सूत्रं व्यर्थम् इति शङ्का अत्र न कर्तव्या। यतो हि प्रकृतं सूत्रमिदं पाणिनीयसूत्रात् पूर्वमेव प्रवर्तमानम्। अतः अस्य पाणिनीयात्पूर्वप्रवृत्तत्वेन नास्ति कोऽपि दोषः। अत एव उच्यते आयार्यैः यत् इदं सूत्रं कर्मधारयवद्भावसिद्धस्य अन्तोदात्तत्वस्य अनुवादकम् इति।

११.२०) शेषं सर्वमनुदात्तम्।

सूत्रार्थः- शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः।

सूत्रावतरणम्- प्रकारादिशब्दानां द्वित्वाद् अन्यस्मिन् द्वित्वे सर्वस्य अनुदात्तस्वरविधानार्थं सूत्रमिदं प्रणीतमाचार्येण।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु इदं विधायकम्। अनेन अनुदात्तस्वरः विधीयते। शेषं सर्वम् अनुदात्तम् इति सूत्रगतपदच्छेदः। शेषम् इति प्रथमैकवचनान्तं पदम्, सर्वम्, अनुदात्तं इति पदद्वयमपि प्रथमैकवचनान्तम्। उक्तादन्यः शेषः। ननु अत्र कः शेषः ? इति जिज्ञासायामुच्यते शेषं प्रकारादिद्वित्वाद् अन्यत् इति। अर्थात् प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः इति सूत्रे प्रकारादिशब्दानां यद् द्वित्वमुक्तं तस्मात् अन्यद् द्वित्वम् अत्र शेषपदवाच्यम्। एवञ्च अत्र पदान्वयः इत्थं- शेषं सर्वम् अनुदात्तम् इति। ततश्च अयं सूत्रार्थः अत्र लभ्यते- प्रकारादि- शब्दानां द्वित्वाद् अन्यस्मिन् द्वित्वे परस्य सर्वस्य अनुदात्तः स्यात् इति।

उदाहरणम्- प्रप्रायम्।

सूत्रार्थसमन्वयः- प्रप्रायम् इत्युदाहरणे प्र इति शब्दस्य द्वित्वं भवति। अपि च प्र इति शब्दः प्रकारादिभिन्नः। अतः तस्य शब्दस्य द्वित्वे प्र प्र इति स्थिते परस्य प्र इति शब्दस्य अकारस्य प्रकृतसूत्रेण अनुदात्तत्वं विधीयते।

पाठगतप्रश्नाः-२

९. शकटिशकट्योरक्षरमक्षरं पर्यायेण इति सूत्रेण कः स्वरः विधीयते ?

१०. ब्राह्मणनामधेयस्य गोष्ठजशब्दस्य अक्षरमक्षरं पर्यायेण उदात्तत्वं केन सूत्रेण ?

११. निपाताः आद्युदात्ताः केन सूत्रेण ?

१२. कम् उपसर्गं वर्जयित्वा अन्येषाम् उपसर्गाणाम् आद्युदात्तत्वम् ?

१३. एवादयः अन्तोदात्ताः केन सूत्रेण ?

१४. चादिगणः आकृतिगणः न वा ?

१५. द्विरुक्तौ प्रकारादिशब्दानां परस्य अन्तः उदात्तः केन सूत्रेण भवति ?

पाठसारः

प्रातिपदिकम् फिट् इत्युच्यते प्राचीनैः आचार्यैः। फिट् इति संज्ञावाचकं पदम्। एषा च संज्ञा महर्षिपाणिनेः पूर्वकालादेव प्रवर्तमाना अस्ति। एतानि सूत्राणि फिषम् अर्थात् प्रातिपदिकम् आश्रित्यैव प्रवर्तन्ते। फिट्-स्वराणां विषये पाठोऽयं वर्तते। छन्दसि च, घृतादीनां च, जेष्ठकनिष्ठयोर्वयसि, तृणधान्यानां च द्रव्यषाम् इत्यादिशास्त्रेण फिट्-स्वराः प्रतिपाद्यन्ते। अस्मिन् पाठे फिट्-स्वरविधायकानि कानिचित् विशेषसूत्राणि आलोच्यन्ते। यतो हि पाठवृद्धिभयात् प्रसिद्धानि एव सूत्राणि अस्माभिः स्वीकृतानि सन्ति। यथा - फिषोन्तः उदात्तः इति सूत्रेण फिषः प्रातिपदिकस्य वा अन्त्यस्य उदात्तः विधीयते। उच्चैः इति पदं पाणिनीयैः सूत्रैः न प्रातिपदिकसंज्ञकम्, अपि तु पूर्वाचार्यैः प्रातिपदिकम् इत्युच्यते। अतः तस्य फिषः

प्रातिपदिकस्य वा उच्चैः इत्यस्य अन्त्यः ऐकारः प्रकृतसूत्रेण उदात्तः भवति। अपरञ्च छन्दसि च इति सूत्रेण दक्षिणशब्दस्य आदिः अन्तः च उदात्तः भवति। दक्षिणः इति वैदिकप्रयोगः। अतः प्रकृतसूत्रेण तस्य दक्षिणशब्दस्य अन्तस्य अकारस्य आदेः अकारस्य च उदात्तत्वं विधीयते। एवञ्च घृतादीनां च इति शास्त्रेण घृतादीनां शब्दानाम् अन्त्यस्वरः उदात्तः विधीयते। एवञ्च ज्येष्ठकनिष्ठयोर्वयसि इति सूत्रेण वयसि अर्थे ज्येष्ठकनिष्ठयोः शब्दयोः अन्त्यस्य स्वरस्य उदात्तत्वं भवति। पुनश्च तृणधान्यानां च द्व्यषाम् इति सूत्रेण द्व्यचां तृणधान्यवाचकानां शब्दानां च आदेः स्वरस्य उदात्तत्वं विधीयते। कुश इति शब्दे अज्द्वयं वर्तते। किञ्च अयं कुशशब्दः तृणवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य कुश-शब्दस्य आदेः स्वरस्य उकारस्य उदात्तत्वं विधीयते। एवं काशाः इति शब्दे अज्द्वयं वर्तते। किञ्च अयं काश-शब्दः धान्यवाची। तस्मात् अनेन प्रकृतसूत्रेण तस्य काश-शब्दस्य आदेः स्वरस्य आकारस्य उदात्तत्वं विधीयते। एवमेव अन्यानि फिट्-स्वरविधायकानि अपि वर्णितानि। पाठे अस्मिन् तेषां सूत्राणां व्याख्यानम्, उदाहरणम्, उदाहरणसङ्गतिश्च प्रदर्श्यते।

पाठान्तप्रश्नाः

१. फिषोऽन्त उदात्तः इति सूत्रं व्याख्यात।
२. छन्दसि च इति सूत्रं व्याख्यात।
३. ज्येष्ठकनिष्ठयोर्वयसि इति सूत्रं व्याख्यात।
४. तृणधान्यानां च द्व्यषाम् इति सूत्रं व्याख्यात।
५. गोष्ठजस्य ब्राह्मणनामधेयस्य इति सूत्रं व्याख्यात।
६. एवादीनामन्तः इति सूत्रं व्याख्यात।
७. चादयोऽनुदात्ताः इति सूत्रं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. प्रातिपदिकम्।
२. छन्दसि च।
३. घृतादीनां शब्दानाम् अन्त्यस्वरः उदात्तः भवति।
४. ज्येष्ठकनिष्ठयोर्वयसि इति सूत्रेण।
५. आदिः इति पदम्।
६. तृणवाचकत्वाभावात् धान्यवाचकत्वाभावाच्च।
७. अक्षस्यादेवनस्य।

८. सुगन्धितेजनस्य ते वा इति सूत्रेण।

उत्तराणि-२

९. उदात्तः स्वरः।

१०. गोष्ठजस्य ब्राह्मणनामधेयस्य इति सूत्रेण।

११. निपाता आद्युदात्ताः इति सूत्रेण।

१२. अभि- इत्युपसर्गं वर्जयित्वा।

१३. एवादीनामन्तः।

१४. आम्, आकृतिगणः।

१५. प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः इति सूत्रेण।

।।इति एकादशः पाठः।।